दशमः पाठः

# राष्ट्रियः सञ्चयः

QCJTLV

**ख्यातिः–** गुरो! अस्मिन् वृक्षे किं लम्बते ?

**शिक्षकः–** ख्याते! किं त्वमेतं न जानासि? अयं मधुकोशः।

**प्रत्यूषः–** कस्माद् मधुकोशोऽयं निर्मितः ?



**शिक्षकः–** प्रत्यूष! मधुमक्षिकाः शनैः शनैः पुष्परसम् आहृत्य एकत्रितं कुर्वन्ति। यदि कोऽपि मधु ग्रहीतुमायाति तर्हि मक्षिकाः तं दशन्ति।

**शिवा –** गुरो ! शनैः शनैः पुष्परसैः कथम् एतावान् महान् मधुकोशः जायते?

**शिक्षकः–** शिवे! न जानासि ? इदं वचनम् प्रसिद्धमस्ति– 'जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।'

**श्यामा–** आम्! ज्ञातम्! अहमपि एकैकस्य रुप्यकस्य सञ्चयेन शतरूप्यकाणि सञ्चितवती।

**शिक्षकः–** त्वम् अस्य धनस्य प्रयोगं कथं करिष्यसि ?

**श्यामा–** गुरो! अहं भूचालेन पीडितजनानां सेवार्थं इदं धनं समर्पयिष्यामि।

**शिक्षकः–** बाढम्! त्वं द्वे कार्ये साधु अकरोः। प्रथमं स्वव्ययार्थं प्राप्तस्य धनस्य सञ्चयः, द्वितीयं च तस्य सञ्चितस्य धनस्य भूचालपीडितजनानां सहायतार्थं प्रदानम्।

(कक्षायाम् अन्यान् छात्रान् सम्बोध्य)

**शिक्षकः–** छात्राः! श्यामां पश्यन्तु। अनया स्वव्ययार्थं प्राप्तधनस्य न केवलं सञ्चयः कृतः अपितु भूचालपीडितेभ्यः प्रदाय सदुपयोगोऽपि कृतः।

**पुष्करः–** गुरो! धनसञ्चयस्तु कोषालयपत्रालयमाध्यमेन च भवति। कृपया भवान् तद्विषये अस्मान् उपदिशतु।

**शिक्षकः–** आम्! छात्राः! देशस्य आर्थिक, सामाजिक, औद्योगिक, विकासाय च धनमावश्यकम्।

**ख्यातिः–** गुरो! धनप्राप्तेः साधनानि कानि कानि ?

**शिक्षकः–** धनप्राप्तिसाधनेषु करग्रहणं, औद्योगिकोत्पादनं इत्यादीनि साधनानि निर्यातं सन्ति। कोषालय–पत्रालय –माध्यमेन च नागरिकाः राष्ट्रियसञ्चययोजनान्तर्गतं धनसङ्ग्रहं कुर्वन्ति।

**शिवा–** राष्ट्रियः सञ्चयः योजना का ?

**शिक्षकः–** शासनेन नगरेषु ग्रामेषु च कोषालयानां पत्रालयानां च शाखाः स्थापिताः। तेषु बालकाः बालिकाः वयस्काश्च धनसञ्चयं कुर्वन्ति। तत्र पत्रालयानां सेवा विशेषरूपेण उल्लेखनीया अस्ति।

**श्यामा :–** तत् कथम् ?

**शिक्षकः–** पत्रालयसञ्चालिताः अनेकाः सञ्चययोजनाः सन्ति।

**पुष्करः–** ताः काः ?

**शिक्षकः–** 'सञ्चयपुरस्कारयोजना,' 'संरक्षितसञ्चययोजना,' 'भविष्यनिधियोजना' इत्यादयः।

**श्यामा–** अहो! पत्रालयमाध्यमेन तु अनेकाः सञ्चययोजनाः सञ्चालिताः।

**शिक्षकः–** अथकिम् ? छात्राणां लाभाय पत्रालयमाध्यमेन विद्यालयेषु सञ्चायिका–योजनायाः अपि व्यवस्था अस्ति।

**प्रत्यूषः–** गुरो! सञ्चायिकायोजनाविषये किञ्चित् कथय ?

**शिक्षकः–** अवश्यम्! श्रृणुत! सञ्चायिकायोजनायां सञ्चेतुं सुविधा अस्ति। विद्यालयेषु सञ्चालित–योजनायां पुरस्कारार्थं व्यवस्था अस्ति।

**ख्यातिः–** गुरो! यदि एवं तर्हि, वयम् अपि स्वकीयं धनं पत्रालयेषु सञ्चितं करिष्यामः।

**शिक्षकः–** अवश्यं कुरुत। आसां सर्वासां योजनानां विषये विवरणं पत्रालयेभ्यः प्राप्तुं शक्यते। छात्राः राष्ट्रियसञ्चययोजना व्यक्तेः, समाजस्य, देशस्य च विकासाय सहायिका। भारतसदृशविकासशीलदेशेषु तु आसां योजनानां महती उपयोगिताऽस्ति। अतः अस्माभिः सञ्चययोजनानां प्रसाराय प्रयत्नो विधेयः। उक्तमपि–

**'क्षणशः कणशश्चैव विद्यामर्थञ्च चिन्तयेत्'**

## शब्दार्थाः

लम्बते = लटकना। जानासि = जानते हो। मधुकोशः = मधुमक्खियों का छत्ता। मधुमक्षिकाः = मधुमक्खियाँ। आहृत्य = लाकर। ग्रहीतुमायाति = लेने के लिए आता है। दशन्ति = डस लेती हैं।

कथम् = कैसे। जायते = होता है। निपातेन = गिरने से। पूर्यते = भरता है। घटः = घड़ा। ज्ञातम् = समझ गया। सञ्चयेन = सञ्चय से। करिष्यसि = करोगे। जलाप्लावनाद् = बाढ़ से। साधु = अच्छा। बाढम् = अवश्य। स्वव्ययार्थं =अपने खर्च के लिए। पत्रालयः = डाकघर। कोषालयः = बैंक। उपदिशतु = उपदेश करें। श्रृणुत = सुनो। प्रसाराय = प्रसार के लिए। विधेयः = करना चाहिए। क्षणशः = क्षण–क्षण से। कणशः = कण–कण से।

## अभ्यासप्रश्नाः

**(1) निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए –**

(क) वृक्षे किं लम्बते ?
(ख) मधुमक्षिकाः किं कुर्वन्ति ?
(ग) घटः कथं पूरितो भवति ?
(घ) श्यामा किं सञ्चितवती ?
(ङ) श्यामा सञ्चितद्रव्यस्य उपयोगं कुत्र करिष्यति ?

**(2) निम्नलिखित शब्दों का सन्धि विच्छेद कर प्रकार बताइये –**

एकैकेन, तत्रैव, बालिकाश्च, उल्लेखनीयाः, इत्यादयः।

**(3) निम्नलिखित शब्दों का विग्रह करते हुए समास का नाम लिखिए–**

पुष्परसम्, स्वव्ययार्थम्, सञ्चितधनस्य, मधुकोषः

**(4) निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) तुम सब धन का सञ्चय करो।
(ख) पानी के एक–एक बून्द से घड़ा भर जाता है।
(ग) मैं पीड़ितों की सहायता करूंगा।
(घ) हम सबको सञ्चय योजना का प्रसार करना चाहिए।
(ङ) देश के विकास के लिये धन आवश्यक है।

QCTPNI

**(5) निम्नलिखित वाक्यों का हिन्दी में अनुवाद कीजिए–**

(क) तत्रैव मक्षिकाः स्थित्वा मधु रक्षन्ति।
(ख) यस्य वार्षिकलाभो भवति।
(ग) जलबिन्दु निपातेन क्रमशः पूर्यते घटः।
(घ) पत्रालयमाध्यमेन अनेकाः सञ्चययोजनाः सञ्चालिताः सन्ति।
(ङ) वयम् अपि धनं सञ्चितं करिष्यामः।

**(6) इस पाठ में प्रयुक्त 'कृ' एवं 'भू' धातु के रूप लट्लकार (वर्तमान काल) एवं लृट्लकार (भविष्य काल) में लिखिए।**

**(7) पाठ में प्रयुक्त उकारान्त शब्द "गुरु" के रुप लिखिए।**